तथान्येति निश्चितम् । भुङ्क्ते भुक्ते त्वयि मुने ! तिष्ठति त्वयि तिष्ठति । विनिद्रिते च निद्राति प्रथमं प्रतिबुध्यते । अनलङ्कृतमात्मानं तव नो दर्शयेत् क्वचित् । कार्य्यार्थं प्रोषिते क्वापि सर्व्वमण्डनवर्जिता । न च ते नाम गृह्णीयात्तवायुष्यविवृद्धये । पुरुषान्तरनामापि न गृह्णाति कदाचन । आक्रुष्टापि नचाक्रोशेत् ताड़ितापि प्रसीदति । इदं कुरु कृतं स्वामिन् ! मन्यतामिति वक्ति च । आहूता गृहकर्म्माणि त्यक्त्वा गच्छति सत्वरम् । किमर्थं व्याहृता नाथ ! सप्रसादोऽभिधीयताम् । न चिरं तिष्ठते द्वारि न द्वारमुपसेवते । अदापितं त्वया किञ्चित् कस्मैचिन्न ददात्यपि । पूजोपकरणं सर्व्वमनुक्ता साधयेत् स्वयम् । नियमोदकबर्हींषि पत्रपुष्पाक्षतादिकम् । प्रतीक्षमाणावसरं यथाकालोचितं हि यत् । तदुपस्थापयेत् सर्व्वमनुद्विग्नातिहृष्टवत् । सेवते भर्तुरुच्छिष्टमिष्टमन्नफलादिकम् । महाप्रसाद इत्युक्त्वा पतिदत्तं प्रतीच्छति । अविभज्य न चाश्नीयात् देवपित्रतिथिष्वपि । परिचारकवर्गेषु गोषु भिक्षुकुलेषु च । संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी । कुर्य्यात् त्वयाऽननुज्ञाता नोपवासव्रतादिकम् । दूरतो वर्ज्जयेदेषा समाजोत्सवदर्शनम् । न गच्छेत् तीर्थयात्रादिविवाहप्रेक्षणादिषु । सुखसुप्तं सुखासीनं रममाणं यदृच्छया । आन्तरेष्वपि कार्य्येषु पतिं नोत्थापयेत् क्वचित् । स्त्रीधर्म्मिणी त्रिरात्रन्तु स्वमुखं नैव दर्शयेत् । स्ववाक्यं श्रावयेन्नापि यावत् स्नाता न शुध्यति । सुस्नाता भर्तृवदनमीक्षतेऽन्यस्य न क्वचित् । अथ वा मनसि ध्यात्वा पतिं भानुं विलोकयेत् । हरिद्रां कुङ्कुमञ्चैव सिन्दूरं कज्जलं तथा । कूर्पासकञ्च ताम्बूलं माङ्गल्याभरणं तथा । केशसंस्कारकवरीकरकर्णविभूषणम् । भर्त्तुरायुष्यमिच्छन्ती दूरयेन्न पतिव्रता । न रजक्या न हैतुक्या तथा श्रमणया न च । न च दुर्भगया क्वापि सखित्वं कुरुते सती । भर्तृविद्वेषिणीं नारीं नैषा सम्भाषते क्वचित् । नैकाकिनी क्वचिद्भूयान्न नग्ना स्नाति च क्वचित् । नोदूखले न मुषले न वर्द्धन्यां दृषद्यपि । न यन्त्रके न देहल्यां सती चोपविशेत् क्वचित् । विना व्यवायसमयं प्रागल्भ्यं न क्वचिच्चरेत् । यत्र यत्र रुचिर्भर्तुस्तत्र प्रेमवती सदा । इदमेव व्रतं स्त्रीणामयमेको धर्म्मः परः । इयमेका देवपूजा भर्तुर्वाक्यं न लङ्घयेत् । क्लीवं वा दुरवस्थं वा व्याधितं वृद्धमेव वा । सुस्थितं दुःस्थितं वापि पतिमेकं न लङ्घयेत् । हृष्टा हृष्टे विषण्णास्या विषण्णास्ये प्रिये सदा । एकरूपा भवेत् पुण्या सम्पत्सु च विपत्सु च । सर्पिर्लवणतैलादिक्षयेऽपि च पतिव्रता । पतिं नास्तीति न ब्रूयादायासेषु न योजयेत् । तीर्थस्नानार्थिनी नारी पतिपादोदकं पिबेत् । शङ्करादपि विष्णोर्वा पतिरेकोऽधिकः स्त्रियाः । व्रतोपवासनियमं पतिमुल्लङ्घ्य नाचरेत् । आयुष्यं हरते भर्त्तुर्मृता निरयमृच्छति । भर्त्तुः प्रत्युत्तरं दद्यान्नारी या क्रोधतत्परा । कुक्कुरी जायते ग्रामे शृगाली निर्ज्जने वने । स्त्रीणां हि परमश्चैको नियमः समुदाहृतः । अभ्यर्च्य चरणौ भर्त्तुर्भोक्तव्यं कृतनिश्चयम् । उच्चासनं न सेवेत न व्रजेत् परवेश्मसु । न त्रपाकरवाक्यानि वक्तव्यानि कदाचन । अपवादो न वक्तव्यः कलहं दूरतस्त्यजेत् । गुरूणां सन्निधौ चापि नोच्चैर्ब्रूयान्न वा हसेत् । या भर्त्तारं परित्यज्य रहश्चरति दुर्म्मतिः । उलूकी जायते क्रूरा वृक्षकोटरशायिनी । ताड़िता ताड़ितुं येच्छेत् सा नारी वृषदंशिका । कटाक्षयति याऽन्यं वै केकराक्षी तु सा भवेत् । या भर्त्तारं परित्यज्य मिष्टमश्नाति केवलम् । ग्रामे सा सूकरी भूयाद्वहिर्वा स्वविड्भुजा । या त्वङ्कृत्य प्रियं ब्रूते सा मूका जायते खलु । या सपत्नीं सदेर्ष्येत दुर्भगा सा पुनः पुनः । दृष्टिं विलुप्य भर्त्तुर्या कञ्चिदन्यं समीक्षते । काणा वा विमुखी वापि कुरूपापि च जायते । बाह्यादायान्तमालोक्य त्वरिता च जलासनैः । ताम्बूलैर्व्यजनैश्चैव पादसंवाहनादिभिः । तथैव चाटुवचनैः खेदसंनोदनैः परैः । या प्रियं प्रीणयेत् प्रीता त्रिलोकी प्रीणिता तया । मितं ददाति हि पिता मितं भ्राता मितं सुतः । अमितस्य हि दातारं भर्त्तारं पूजयेत् सदा । भर्त्ता देवो गुरुर्भर्त्ता धर्म्मतीर्थव्रतानि च । तस्मात् सर्व्वं परित्यज्य पतिमेकं समर्च्चयेत् । जीवहीनो यथा देहः क्षणादशुचितां व्रजेत् । भर्तृहीना तथा योषा सुस्नाताप्यशुचिः सदा । अमङ्गलेभ्यः सर्व्वेभ्यो विधवा ह्यत्यमङ्गला । विधवादर्शनात् सिद्धिर्जातु यातुर्न जायते । विहाय मातरं चैकां सर्व्वामङ्गलवर्जिताम् । तदाशिषमपि प्राज्ञस्त्यजेदाशीविषोपमाम् । कन्यां विवाहसमये वाचयेयुरिति द्विजाः । पत्युः सहचरी भूया जीवतोऽजीवतः सदा । भर्त्ता सदानुयातव्यो देहवत्